[८३९] औत्वप्रतिषेधः [1]साकच्कस्य वा वक्तव्यः सादुत्वं च । (म. भा. ३. ३१२)

यदा [2]च औत्वप्रतिषेधः तदा सकारादुत्तरस्य उत्वं भवति । असुकः । असुकौ ।

[८४०] उत्तरपदभूतानां त्यदादीनामकृतसन्धीनामादेशा वक्तव्याः । (म. भा. ३. ३१२)

परमाहम् । परमायम् । परमानेन ।

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।
ह्रस्वाल्लुप्येत सम्बुद्धिर्न हलः प्रकृतं हि तत् ॥

आप एत्वं भवेत् तस्मिन् न झलीत्यनुवर्तनात् ।
प्रत्ययस्थाच्च कादित्वं शीभावश्च प्रसज्यते ॥

## इदमो मः । (१०८/३४३)

[3]इदमः सौ परतः [4]मकारोऽन्तादेशो भवति । इयम् । अयम् । इदमो मकारस्य मकारवचनं त्यदाद्यत्वबाधनार्थम् ॥

## दश्च । (१०९/३४७)

इदमो दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः । इमौ, इमे । इमम्, इमौ, इमान् ॥

## यः सौ । (११०/४४१)

इदमो मकारस्य यकारादेशो भवति सौ परतः । इयम् । उत्तरसूत्रे पुंसि इति वचनात् स्त्रियामयं यकारः ।[1]

## इदोऽय् पुंसि । (१११/३४४)

इदमः इद्रूपस्य पुंसि सौ परतः अय् इत्ययमादेशो भवति । अयं ब्राह्मणः । पुंसि इति किम् ? इयं ब्राह्मणी ॥

## अनाप्यकः । (११२/३४६)

इदमः [5]अककारस्य इद्रूपस्य स्थाने [6]अन इत्ययमादेशो भवति आपि विभक्तौ परतः । अनेन । अनयोः । अकः इति किम् ? [7]इमकेन । इमकयोः । आपि इति प्रत्याहारः तृतीयैकवचनात् प्रभृति सुपः पकारेण ॥

---

1. साकच्कत्वात् क. 2. च नास्ति क. 3. सौ इति वर्तते इत्यधिकम् क. 4. मकारादेशो ब. 5. अकस्य क. 6. अनादेशो भवति क. 7. नास्ति क.